26

॥ ग॥ शिवपूजा ॥

पी

पा॰ पू॰
१

श्रीगणेशायनमः अथपार्थिवपूजाविधिः
तत्र कालाग्निरुद्रोपनिषद्विधिनासर्वांगंभस्मो
धूल्याप्रत्यंगंरुद्राक्षांधृत्वा सदाशिवंमनसा॰
ध्यायन उदीचींगत्वा ॐ स्योनापृथि॰ सप्रथः
इतिमंत्रेणभूमिंप्रार्थ्य भूमिर्भूम्नाद्यौर्वरिणांत
रिक्षंमहित्वा उपस्थेतेदेव्यदितेग्निमन्नादमन्ना
द्यायादधे इतिमंत्रेणतृणकंटकवालुकादिरहि

१

तं ॐ येपथां॰ युधः इतिमंत्रेणमृत्तिकांगृहीत्वा
ॐ नमोरुद्रेभ्योयेपृ॰ वोजंभेदधामि इतिमंत्रे
णसंस्थाप्य ॐ मानस्तोके तनयेमान॰ हविष्मं
तोनमसाविधेमते इतिमंत्रेणजलैःसंप्रोक्ष्य रु
द्रसूक्तेनयथोक्तलिंगंविधाय लिंगमस्तकवि
स्तारोलिंगोच्छ्रायसमोमनः परिधिस्तत्त्रिगुणि
तं हस्तीठंव्यवस्थितं प्रनालिंगातथैवस्यालिंग

पा॰पू॰
२

मात्रव्यवस्थिता इति लिंगं कृत्वा वामपाणिवे
दिकायास्ताम्रपात्रे वा साक्षतलिंगं संस्थाप्य
सुमुखश्चेत्यादि पुण्यतिथौ सकलकामनासि
ध्यर्थं पार्थिवलिंगपूजनमहं करिष्ये तत्रादौ
प्राणप्रतिष्ठां करिष्ये प्राणप्रतिष्ठां कृत्वा ॐ
आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं अस्यां
पार्थिवेश्वरमृन्मयमूर्तौ प्राणा इह प्राणाः ॐ २

आं ह्रीं क्रौं इत्यादि जीव इह स्थिताः ॐ आं ह्रीं
क्रौं॰ अस्यां पार्थिवेश्वरमृन्मयमूर्तौ सर्वेंद्रि
याणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राण
पाणिपादपायूपस्थ इहैवागत्य सुखं चिरं ति
ष्ठंतु स्वाहा गर्भाधानादिपंचदश संस्कारसि
ध्यर्थं पंचदश प्रणवावृत्तीः करिष्ये रक्तांबो॰
धिस्थपोतोल्लसत्तरुणसरोजाधिरूढाकराब्जैः

पा॰पू॰
३

पाशांकोदंडमिक्षुद्भवमथगुणमंकुशंपंचबाणा
न बिभ्राणासृक्कपालंत्रिनयनविलसत्पीन
वक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुख
करीप्राणशक्तिःपरानः अस्यैप्राणाःप्रतिष्ठं
तुअस्यैप्राणाःक्षरंतिच अस्यैदेवत्वमर्चायैमा
महेतिचकश्चन असुनीतेपुनरस्मासुचक्षुः
ललाटे ॐशर्वायनमः कंठेरुद्रायनमः ना ३

भौईशानायनमः जान्वोःशंकराय॰ पादयोः
सर्वव्यापिनेन॰ अथध्यानं ध्यायेन्नित्यं॰
आत्मावहंतुहरयः॰ ॐ स्तारायनमः आवा
हनं ॐनेमःशंभवेचमयोभवेच आसना
र्थेअक्षतान्स॰ ॐनमःशंकरायचमयस्क
रायच पादयोःपाद्यं॰ नमःशिवायचशिवत
रायच अर्घ्यं॰ ॐनमस्तीर्थ्यायचकूल्यायच

आचमनी॰ अथपंचामृतस्नानं आपोहिष्ठा॰
ऋक् ३ पार्थेभ्वरा॰ शुद्धोदकस्ना॰ आचमनीयं
ॐ वामदेवायनमः वस्त्रं॰ ज्येष्ठायनमः उप
वस्त्रं ॐ श्रेष्ठायनमः यज्ञोपवीतं ॐ रुद्रायन
मः सर्वाभरणार्थे अक्षतान्॰ कालाय॰ गंधंस॰
ॐ कलविकरणायनमः तिलाक्षतान्सा॰ ॐ
बलविकरणाय॰ बिल्वपत्रं॰ बलाय॰ धूपं॰

ॐ बलप्रमथनाय॰ दीपं॰ ॐ सर्वभूतदमना
यनमोमनोन्मनायनमः नैवेद्यं॰ मध्येपानीयं
उत्तरापो॰ मुखप्र॰ हस्तप्र॰ आच॰ अघोरेभ्य
इतिमंत्रेणतांबूलं तत्पुरुषायइतिदक्षिणां॰
ॐ तेजोसितेजोमेयच्छ मंगलनीराजनं ॐ ई
शानायेति मंत्रपुष्पांजलिं॰ आत्मप्रदक्षिणान
मस्कारः अथपंचामृतअर्चनेन भगवानस

वीत्मा पार्थिवेश्वरः प्रीयतांनमम निर्माल्यंवि
सृज्य अभिषेकं कुर्यात् मानस्तोकेइतिमंत्रे
णवस्त्रंस॰ ॐनमोवृद्धायचसंवृध्वनेच यज्ञो
पवीतं ॐ श्वभ्यः श्वपतिभ्यश्ववोनमः गंधंस॰
ॐनमःसोमायचरुद्रायच तिलाक्षतां॰ ॐन
मः पार्यायचावार्यायच पुष्पंस॰ ॐनमो बि
ल्मिनेचकवचिनेच बिल्वपत्रंस॰ ॐनमोगो

ष्ठ्यायचगृह्यायच धूपं॰ नमःकपर्दिनेचव्यु
प्तकेशायच दीपं॰ ॐनमोबभ्लुशायनिव्या
धिनेन्नानांपतयेनमः नैवेद्यं॰ मध्येपा॰ उ
त्तरा॰ मुखप्रक्षा॰ हस्तप्र॰ करोद्वर्तनं॰ ॐ
नमःपर्ण्यायचपर्णशद्यायच फलंतांबूलं॰
ॐनमोहिरण्यबाहवेसेनान्येदिशांचपतये
नमः दक्षिणां॰ तेजोसितेजोमेयच्छ नीरांज

नदीपं ईशानः सर्वविद्या॰ सदाशिवों मंत्रपु
ष्पं॰ ॐ नमोरुद्रेभ्योये॰ वोजं भेदधामि प्रद
क्षिण्यां नमस्कारां समर्प्य लिंगस्योपरि ईशाना
दिक्रमेण अष्टपुष्पांजलिं दद्यात् ॐ भवाय
क्षितमूर्त्तयेनमः ॐ शर्वायक्षितिमूर्त्तयेनमः
ॐ रुद्राय अग्निमूर्त्तयेनमः ॐ उग्राय वायु
मूर्तयेनमः ॐ भीमाय आकाशमूर्त्तयेनमः

ॐ महादेवाय सोममूर्त्तयेनमः ॐ पशुपत
ये यजमानमूर्त्तयेनमः ॐ ईशानाय अर्कमू
र्त्तयेनमः ८ नम ओंकाररूपाय नमोक्षरल
षट्कने नमोनादालसनेतुभ्यं नमो विंदुक
लालसने अलिंग लिंगरूपाय रूपातीताय ते
नमः त्वं माता सर्वलोकानां त्वमेव जगतः पिता
त्वं भ्राता त्वं सुहृन्मित्रो त्वं पिता स्तु पितामहः

तेनमेभगवन्रुद्रोवांछितार्थप्रयछमे पार्थि
वानांचलिंगानांयन्मयापूजितंकृतं इतिस्तुतिः
अथउत्तरपूजा यांतुदेवगणाःसर्वे॰गमनाय
च अभ्यारमितद्वयो॰र्जने अनेनपार्थिव
लिंगपूजनेनश्रीभवानीशंकरमहारुद्रप्री
यतांनमम श्रीसांबसदाशिवार्पणमस्तु
शुभंभवतु अथैकादशप्रकारेणलिंगपू

जनं प्राणायोगेवियोगश्चधनयोगवियोग
तः निमिषंनिमिषार्धवाशीघ्रंतुशिवपूज
नं अनेनप्रकारेणपूजांकृत्वा हरायनमइ
तिमृत्तिग्रहणं महेशायेतिसंघट्टनं शूल
पाणयेतिपीठोपरिसंस्थापनं मंगलायत
नंदेवंभवतानंमहेश्वरं ध्यायेत्कल्पतरोर्मू
लेसुखासीनसहोमया अथऋणविमोच

पा॰पू॰ नकामः प्रत्यहं एकलिंगं कृत्वा शतदिनपर्यं
९ तं बृहतीपुष्पं घृतनैवेद्यं अनृणाअस्मिनृ
णा॰ इत्यृचं अष्टोत्तरशतं जपेत् ऋणविर्मुक्तो
भवति अथपुत्रकामः प्रत्यहंलिंगद्वयं कृ
त्वा शतदिनपर्यंतं पंचामृतेनाभिषिंच मल्लि
कापुष्पं गुडोनैवेद्यं कांडात्कांडात्प्ररोहंतीतिशतम
ष्टोत्तरं जप्त्वा अनेनमंत्रेण अष्टोत्तरशतदूर्वाः ९

समर्पयेत् पुत्रकामोभवति अथकन्याकामः
प्रत्यहंलिंगत्रयं कृत्वा त्रिंशद्दिनपर्यंतं करवी
रपुष्पं शर्करानैवेद्यं पावीरवीकन्येतिमंत्रेणा
ष्टोत्तरशतं जपेत् अथधनकामः प्रत्यहंचत्वा
रिलिंगानिकृत्वा चतुःशतदिनचंपकपुष्पं कद
लीफलनैवेद्य श्रीसूक्तं प्रत्यहं दशवारं जपेत् ध
नकामोभवति अथविवाहकामः प्रत्यहंपंचलिं

पा॰पू॰
१

गानिकृत्वा पंचशतदिनपर्यंतंचंपकपुष्पंपायस
नैवेद्यं गौरीर्मिमायेत्यृचं अष्टोत्तरशतंजपेत् वि
वाहोभवति अथकलहविमुक्तकामः प्रत्यहंष
ट्‌लिंगानिकृत्वा षट्‌शतदिनपर्यंतं बकुलपुष्पं
मधुनैवेद्यं मुंचामित्वेतिसूक्तानि प्रत्यहंदशवा
रंजपेत् कलहविमुक्तोभवति तीर्थयात्राकामः
प्रत्यहंसप्तलिंगानिकृत्वा पंचशतदिनपर्यंतंश

१

तपत्रपुष्पं दध्योदननैवेद्यं रुद्रैकादशानिकृत्वा
तीर्थयात्राभवति अथविद्याकामः प्रत्यहंअष्टौ
लिंगानिकृत्वा त्रिंशद्दिनपर्यंतं बिल्वपत्रंलड्डुक
नैवेद्य यश्छंदसामृषभोत्यनुवाकं दशवारंजपे
त् विद्यावान्भवति अथापमृत्युहरणकामः
प्रत्यहंनवलिंगानिकृत्वा एकशतदिनपर्यंतंध
त्तूरपुष्पं दध्योदननैवेद्यं त्र्यंबकमित्यृचंअष्टो

पा॰पू॰

१०

त्तरशतजपंकुर्यात् अपमृत्युनाशनंभवति
अथद्वीरागमनकामः प्रत्यहंदशलिंगानिकृ
त्वा वर्षमेकंकांचनपुष्पंअपूपनैवेद्यं उपश्वा
सयपृथिवीमुतद्यामित्यृचत्रयं अष्टोत्तरशतं
जपित्वा दूरागमनस्यागमोभवति अथदारिद्र
निवृत्तिकामः प्रत्यहं एकादशलिंगानिकृत्वा
षण्मासपर्यंतं रक्तद्रोणपुष्पैर्वासंपूज्य

सर्वमन्नगोघृतयुक्तेननैवेद्यं नमोहिरण्यबा
हवेत्यृचंअष्टोत्तरशतंजपेत् भाग्यवान्भवति
इत्येकादशलिंगप्रकरणंसंपूर्णं अथकामना
परत्वसंख्या कारग्रहेमोक्षकामः एकविंश
तिदिनपर्यंतंएकोत्तरवारवृध्यालिंगानिकृ
त्वाद्वाविंशतिदिनेलिंगमेकंन्यूनंकृत्वायाव
ल्लिंगमेकंभवति तावत्प्रत्यहंरुद्रैकादशन्या

पा०पू०
११

संअभिषेकंकृत्वा पलाशपुष्पं दधिमधुघृतमि
श्रनैवेद्यं योरुद्रोअग्नौयोअप्सु इतित्वरितरु
द्रमष्टसहस्रंजपेत कारग्रहमोक्षंभवति एक
लिंगंपापहरं द्विलिंगंश्रीकरं त्रिलिंगंसर्वकाम
दं विद्याकामेसहस्रेकं स्त्रीकामेपंचशतं
पुत्रकामेपंचसहस्रेकं कन्याकामोत्रिशतं भू
कामेसहस्रं रूपकामेत्रिसहस्रं तीर्थयात्रा ११

द्विसहस्रं सुहृत्कामेसहस्रं वस्त्रकामेश
शतं राज्यकामेलक्षं जारणेपंचशतं मार
णेसप्तशतं स्तंभनेसहस्रं मोहनेसहस्रं
उच्चाटनेसहस्रं कारग्रहेविमुक्तनेअयुतं
निगडविमोचनेसार्द्धलक्षं वापंचसहस्रं चो
रभयेद्विसहस्रं डाकिन्यादिभयेअयुतंवापं
चशतं दारिद्र्यमोचनेपंचसहस्रं सर्वकामेअ

पा॰पू॰ युतं वंध्याकामेअयुतं कन्याकामेअयुतं मो

१२ क्षकामेलक्षं तस्यपूजाविधानेपूर्वमेव सुवर्ण

लिंगेसौभाग्यकरं रौप्यलिंगेयशस्करं ताम्र

लिंगंपुष्टिकरं कांस्यलिंगंकीर्तिकरं पीतलिं

गंपुष्टिकरं लोहितलिंगंशत्रुमारकं सीसलिं

गंआयुःकरं पाषाणलिंगंपुण्यकरं काश्मीर

लिंगंश्रीकरं स्फटिकलिंगंबहुस्वामित्वकरं १२

इंद्रनीललिंगंभयनाशकरं मुक्तामयलिंगंश्रे

यस्करं पारजलिंगंसत्वकरं चंदनलिंगंज्वर

नाशकरं कर्पूरलिंगंशांतिकरं कस्तूरिसंभ

वलिंगंसुगंधिकरं गोरोचनलिंगंरूपकरं ह

रिद्रालिंगंप्रीतिवर्धनकरं नवनीतलिंगंकीर्ति

करं दधिलिंगंकीर्तिकरं दुग्धलिंगंसुखकरं

शर्करालिंगंपुत्रकरं लवणोत्थलिंगंसर्ववश्य

पा॰पू॰ करं इतिलिंगप्रकारकालाग्निरुद्रोपनिषद्लिं
१३ गपद्धतौसमाप्तः श्रीसांबसदाशिवार्पणमस्तु
श्रीरस्तु शुभंभवतु ७ ॥१००॥

१३